International Journal of Sanskrit Research 2023; 9(6): 36-39

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 36-39
© 2023 IJSR
www.anantaajournal.com
Received: 04-10-2023
Accepted: 08-11-2023

**Dr. SS Mukundan**
Asistant Professor, Department of Visishtadvaitha Vedantha, Sri Ahobhila Mutt Adarsh Sanskrit Maha Vidyalaya, Madurantakam, Tamil Nadu, India

**Corresponding Author:**
**Dr. SS Mukundan**
Asistant Professor, Department of Visishtadvaitha Vedantha, Sri Ahobhila Mutt Adarsh Sanskrit Maha Vidyalaya, Madurantakam, Tamil Nadu, India

# योगशास्त्रे संयमप्रयोजनानि

**Dr. SS Mukundan**

## प्रस्तावना

तत्र प्रथमं तावत् योगशब्दस्य अर्थः तावत् – "युज समाधौ", अथवा "युजिर् योगे" वा धातोः भावे इति सूत्रेण घञ् प्रत्यये योगशब्दः सिद्ध्यति। 'योगः' इति सन्नहनोपायध्यानसङ्गतियुक्तिषु इति अमरकोशस्य वाक्येन योगशब्दः कवच , उपाय, ध्यान, सममबन्ध, योग्यता इत्यर्थेषु वर्तते इति ज्ञायते। शास्त्रेष्वपि योगशब्दः नानार्थेषु उपयुक्तः दृश्यते। युज समाधौ। "समाधिश्चित्तवृत्तिनिरोधः" इति सिद्धान्तकौमुद्याम्। योगश्चित्तवृत्तिनिरोधः इति पातञ्जनयोगसूत्रे। अनन्तरं योगक्षेमं वहाम्यहम् इति श्रीमद्भगवद्गीतायाम्। अत्र अप्राप्तस्य प्राप्तिः योगः इति तत्रैव शाङ्करभाष्ये। "समत्वम् योग उच्यते, योगः कर्मसु कौशलम्" इति भगवद्गीतायाम्। एवं रीत्या तत्र तत्र योगविषये वाक्यानि उपलभ्यन्ते। तत्र कुत्रचित् युजिर् योगे धातोः प्रयोगः दृश्यते। परन्तु बहुत्र प्रधानस्थलेषु युज समाधौ धातोः एव प्रयोगः साधु भवति।

योगशास्त्रे तावत् – पादचुष्ठयं वर्तते। समाधिपादः,साधनपादः, विभूतिपादः, कैवल्यपादः इति। पादचतुष्ठयेषु संयममधिकृत्य तृतीये विभूतिपादे विस्तृततया प्रतिपादितं भवति। अष्टाङ्गानि तावत् – यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधयो अष्टावङ्गानि इति। संयमम् नाम – "त्रयमेकत्र संयमः" इति सूत्रोक्तप्रकारेण, एकस्मिन् विषये धारणाध्यानसमाधित्रयं प्रवर्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते। तत् धारणादित्रयं एकत्र एकविषये क्रियमाणं संयम इत्युच्यते इत्यर्थः।तत्र धारणा नाम "देशबन्ध चित्तस्य धारणा"। अर्थात् यत्र हृत्पुण्डरीकादिरूपे देशे ध्येयं चिन्तनीयं तत्र देशे चित्तस्य बन्धः ऐकाग्र्यं धारणा इत्यर्थः। देशे नाभिचक्रनासाग्रादौ चित्तस्य बन्धः विषयान्तरपरिहारेण यत् स्थिरीकरणं सा चित्तस्य धारणा इत्युच्यते। तदुक्तम् योगि याज्ञवल्क्ये – यमादिगुणयुक्तस्य मनसः स्थितिरात्मनि । धारणेत्युच्यते सद्भिः योगशास्त्रविशारदैः इति। अनन्तरं ध्यानं नाम – तत्र "प्रत्यय एकतानता ध्यानम्" इति। तत्र एकस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य एकतानता विसदृशपरिणाम परिहारद्वारेण यदेव धारणायाम् आलम्बनीकृतं तदालम्बनतयैव

निरन्तरमुत्पत्तिः सा ध्यानमुच्यते। अर्थात् यत्र धारणा विजातीयप्रवृत्तिपरिहारे यत्नापेक्षा भवति तत्रैव वा प्रत्ययानां वृत्तीनाम् एकतानता यत्नमपेक्ष्य एकविषयता तत् ध्यानम् इत्यर्थः। तद्रूप प्रत्ययेचैकाग्रसन्ततिश्चान्यनिस्पृहा। तद्ध्यानं प्रथमैः षड्भिः अङ्गैर्निष्पाद्यते तथा इति।

अनन्तरं समाधिः – "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" इति। तदेव उक्तलक्षणम् ध्यानं यथार्थमात्रनिर्भासम् अर्थाकारसमावेशात् उद्भूतार्थरूपम् अश्रुतम् ज्ञानस्वरूपत्वेन स्वरूपशून्यतामिव आपद्यते सः समाधिरित्युच्यते। समाधिः द्विविधः। संप्रज्ञातसमाधिः, असंप्रज्ञातसमाधिः। एवं च संयगाधीयते एकाग्रीक्रियते यत्र मनः स समाधिः इति। एवं च उक्तलक्षणस्य धारणा ध्यान समाधिरूप योगाङ्गत्रयस्य व्यवहाराय स्वशास्त्रे तान्त्रिकीं संज्ञां उच्यते त्रयमेकत्रसंयमः इति। तज्जयात्प्रज्ञालोकः इत्यनेन तस्य संयमस्य जयात् अभ्यासेन सात्स्योत्पादनात् प्रज्ञायाः विवेकस्वरूपायाः आलोकः प्रसन्नो भवति। अर्थात् प्रज्ञा ज्ञेयं सम्यक् अवभासयति इत्यर्थः।

ततः "तस्य भूमिषु विनियोगः" सूत्रादारभ्य संयमस्य प्रयोजनानि उच्यन्ते। अर्थात् कुत्र विनियुक्तस्य संयमस्य फलम् एतत् स्यात् इति चेत् तत्रोच्यते – तस्य संयमस्य जितायाः भूमेर्यानन्तरा अजिताः भूमिः तत्र विनियोगः। स्थूलविषये सवितर्कसमाधौ संयमेन वशीकृते निर्विचारे विनियोगः इत्यर्थः। ततः परिणामत्रयसंयमात् अतीत अनागत ज्ञानम् इति। निरोधपरिणामः, समाधिपरिणामः, एकाग्रतापरिणामः इत्येवरूपे परिणामत्रये संयमे कृते अतीत, अनागकवस्तु साक्षात्कारो भवति। अर्थात् चित्तसत्त्वं हि निसर्गतः सर्वार्थप्रद्योतनस्वभावम्, रजस्तमोमलप्रतिबन्धस्य संयमेन प्रक्षये सति प्रमाणमपेक्ष्य सर्वं जानाति इत्यर्थः।

"शब्दार्थप्रत्ययानाम् इतरेतराध्यासात् संकरतत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्" इति। गौः इति शब्दः गौरित्यर्थः गौः इति प्रत्ययः इति आबालपण्डितं शब्दार्थप्रत्ययानाम् इतरेतराभेद अध्यासात् संकरः प्रसिद्धिः। तेषाम् वर्णद्वयं पदं, पदद्वयं वाक्यम्, शक्त्यादिवृत्या बोधकम् इति शब्दतत्वम्। अर्थः द्रव्यादिर्वाच्यः लक्ष्यश्चेति अर्थतत्वम्। शब्दजन्यः अर्थविषयः प्रत्ययः इति ज्ञानतत्वम्, इति या प्रविभागः शास्त्रयुक्तिभ्यां सिद्धः। तस्मिन् संयमात् सर्वशब्दादिवशीकारसूचकम् सर्वभूतानाम् पक्ष्यादीनाम् रुतज्ञानं भवति इमम् अर्थम् एते संगिरन्त इति संयमी जानातीत्यर्थः।

"संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्"। अनुभवक्लेसजाः स्मृतिक्लेसहेतवः, कर्मजाः सुकदुःखहेतवः, इति द्वये संस्काराः चित्तधर्माः पूर्वजन्मपरम्परासंचिताः सन्ति। तेषु श्रुतेषु अनुमितेषु च संयमेन साक्षात्कृतेषु तद्धेतुत्वेन स्वीयपरकीयपूर्वजन्मपरम्परायाः साक्षात्कारो भवति। ततः प्रत्ययस्य परचित्तज्ञानम् इति। प्रत्ययस्य परचित्तस्य केनचित् मुखरागादिलिङ्गेन गृहीतस्य यदा संयमं करोति तदा परकीयचित्तस्य ज्ञानमुत्पद्यते इत्यर्थः।

ततः "कायरूपसंयमात् तद्ग्राह्य शक्तिस्तम्भे चक्षुष्प्रकाशासंप्रयोगे अन्तर्धानम्" इति। कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यः गुणः तस्मिन्नस्ति अस्मिन्काये रूपमिति संयमात् तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपा या शक्तिः तस्याः स्तम्भे भावनावशात् प्रतिबन्धे चक्षुष्प्रकाशासंप्रयोगे चक्षुषः प्रकाशसत्त्वधर्मः तस्यासंयोगे तद्ग्रहणव्यापाराभावे योगिनः अन्तर्धानं भवति। न केनचिदसौ दृश्यते इत्यर्थः। ततः मैत्र्यादिषु बलानि इति मैत्र्यादिषु विहितः यः संयमः तस्य बलानि मैत्र्यादीनां सम्बन्धीनि प्रादुर्भवन्ति। मैत्र्याद्युत्कर्मे सर्वस्य मित्रत्वादिकम् प्रतिपाद्यते।

अनन्तरम् "सोपक्रमं निरुपक्रमं च कर्म तत्संयमात् अपरान्तज्ञानम्" इति। सोपक्रमम् तीव्रवेगेन फलदातृ। निरुपक्रमम् मन्दवेगेन फलदातृ। एवम्भूतं यत्कर्मार्थात् प्रारब्धफलकम् आयुष्करम् तत्साक्षात्कारेणैव आयुर्निर्णयौचित्यात्, तत्र संयमात् तदन्यतररूपेण तत्साक्षात्कारे सति अपरान्तस्य पश्चिमस्य मरणस्य ज्ञानम् भवति इत्यर्थः। बलेषु हस्तिबलादीनि इति। अर्थात् हस्त्यादिसम्बन्धिषुबलेषु कृतसंयमस्य तद्बलानि हस्त्यादिबलानि आविर्भवन्ति। यस्मिन् हस्तिबले वायुवेगे,

सिंहवीर्ये वा तन्मयीभावेन यः संयमं करोति तत्तत्सामर्थ्ययुक्तं सत्त्वम् अस्य प्रादुर्भवन्ति इत्यर्थः।

ततः "प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्" इति। प्रवृत्तिविषयवती ज्योतिष्मती च प्रागुक्ता तस्याः यः असौ आलोकः सात्त्विकप्राकाशप्रसरः तस्य निखिलेषु विषयेषु न्यासात् तद्वासितानां विषयाणां भावनात् सान्तः करणेषु इन्द्रियेषु प्रकृष्टशक्तिमापन्नेषु सूक्ष्मस्य परमाण्वादेर्व्यवहितस्य धूम्यन्तर्गतस्य निधानादेर्विप्रकृष्टस्य मेरु अपरपार्श्ववर्तिनः रसायनादेः ज्ञानमुत्पद्यते इत्यर्थः।

ततः परम् "भुवन ज्ञानम् सूर्ये संयमात्" इति। सूर्ये संयमं करोति तस्य सप्तसु भूर्भुवःस्वःप्रभृतिषु लोकेषु यानि भुवनानि तत्तत्संनिवेशभाञ्चि स्थानानि तेषु यथावदवस्थ ज्ञानमुत्पद्यते इत्यर्थः। अनन्तरं चन्द्रे तारकाव्यूहज्ञानम् इति। ताराणां ज्योतिषां यः व्यूहः विशिष्टः संनिवेशः तस्य चन्द्रे कृतसंयमस्य ज्ञानमुत्पद्यते।

ततः "ध्रुवे तद्गतिज्ञानम्" इति। ध्रुवे निश्चले ज्योतिषाम् प्रधाने कृतसंयमस्य तासां ताराणां या गतिः प्रत्येकं नियतकला नियतदेशा च तस्याः ज्ञानमुत्पद्यते। ततः नाभिचक्रे कायव्यूहज्ञानम् इति। शरीरमध्यवर्ति नाभिसंज्ञकं यत् षोडशारं चक्रं तस्मिन् कृतसंयमस्य योगिनः कायगतः यः असौ व्यूहः विशिष्टरसमलधातुनाड्यादीनाम् अवस्थानम् तत्र ज्ञानमुत्पद्यते।

ततः परम् "कण्ठकूपे क्षुत्पिपासानिवृत्तिः" इति। कण्ठे गले कूपः कण्ठकूपः जिह्वातन्तोः अधस्तात् कूप इव कूपो गर्ताकारः प्रदेशः प्राणादेर्यत् संस्पर्शात् प्रादुर्भवन्ति। तस्मिन् कृतसंयमस्य योगिनः क्षुत्पिपासादयः निवर्तन्ते। ततः मूर्धज्योतिषि सिद्धदर्शनम् इति। अर्थात् शिरःकपाले ब्रह्मरन्ध्राख्यं छिद्रं प्रकाशाधारत्वात् ज्योतिः। यथा – गृहाभ्यन्तरस्थस्य मणेः प्रसरन्ती प्रभा कुञ्चिताकारेव सर्वप्रदेशे संघटते, तथा हृदयस्थः सात्त्विकः प्रकाशः प्रसृतस्तत्र संपिण्डतत्त्वं भजते। तत्र कृतसंयमस्य ये द्यावापृथिव्योः अन्तरालवर्तिनः सिद्धाः दिव्याः पुरुषास्तेषाम् इतरप्राणिभिरदृश्यानाम् तस्य दर्शनम् भवति। तान् तैश्च स सम्भाषत इत्यर्थः।

ततः हृदये चित्तसंवित्, सत्त्वपुरुषयोः अत्यन्तासंकीर्णयोः प्रत्ययाविशेषाद्भोगः परार्थान्यस्वार्थसंयमात् पुरुषज्ञानम् इत्यादिकमपि उक्त्वा अन्ते तावत् संयमस्य फलमुच्यते – "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते" इति। ततः पुरुषसंयमात् अभ्यस्यमानात् व्युत्थितस्यापि ज्ञानानि जायन्ते। तत्र प्रातिभं पूर्वोक्तं ज्ञानं तस्याः आविर्भावात् सूक्ष्मादिकमर्थं पश्यति। श्रावणं - श्रोत्रेन्द्रियजं ज्ञानम्, तस्माच्च प्रकृष्टाद्दिव्यम् – दिवि भवं शब्दम् जानाति। वेदना – स्पर्शेन्द्रियजं ज्ञानम्, वेद्यते अनया इति कृत्वा, तान्त्रिक्या संज्ञया व्यवह्रियते, तस्मात् द्यस्पर्शविषयं ज्ञानं समुपजायते। आदर्शश्चक्षुरिन्द्रियजं ज्ञानं, आ समन्तात्दृश्यते अनुभूयते रूपम् अनेनेति कृत्वा, तस्य प्रकर्षाद्दिव्यं रूपज्ञानमुत्पद्यते।

ततः आस्वादः - रसनेन्द्रियजं ज्ञानम्, आस्वाद्यते अनेनेति कृत्वा तस्मिन्प्रकृष्टे दिव्ये रसे संवित् उपजायते। वार्ता – गन्धसंवित् वृत्तिशब्देन तान्त्रिक्या परिभावनया घ्राणेन्द्रियमुच्यते। वर्तते गन्दविषय इति कृत्वा, वृत्तेः घ्राणेन्द्रियाख्याता वार्ता गन्धसंवित्। तस्यां प्रकृष्यमाणायां दिव्यगन्धः अनुभूयते। इत्येवंरीत्या संयमस्य फलम् योगशास्त्रे निरूपितम् भवति।।

## References


1. समाधिश्चित्तवृत्तिनिरोधः –(योगसूत्रम् – समाधिपादः – सूत्रम् 2)
2. समत्वम् योग उच्यते - ( भगवद्गीता – अध्यायम् 10 – श्लो – 13)
3. योगः कर्मसु कौशलम् – ( भगवद्गीता – अध्यायम् 10 – श्लो – 16)
4. त्रयमेकत्र संयमः – (योगसूत्रम् – विभूति पादः – सूत्रम् 4)
5. देशबन्धः चित्तस्य धारणा - (योगसूत्रम् – विभूति पादः – सूत्रम् 1)

6. तत्र प्रत्यय एकतानता ध्यानम् - (योगसूत्रम् – विभूति पादः – सूत्रम् 2)
7. तदेवार्थ ........समाधिः - (योगसूत्रम् – विभूति पादः – सूत्रम् 3)
8. तस्य भूमिषु विनियोगः - (योगसूत्रम् – विभूति पादः – सूत्रम् 6)
9. शब्दार्थप्रत्ययानाम्......... सर्वभूतरुतज्ञानम् - (योगसूत्रम् – विभूति पादः – सूत्रम् 17)
10. संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् - (योगसूत्रम् – विभूति पादः – सूत्रम् 18)
11. कायरूपसंयमात् ......... अन्तर्धानम् - (योगसूत्रम् – विभूति पादः – सूत्रम् 21)
12. सोपक्रमं ........ अपरान्तज्ञानम् - (योगसूत्रम् – विभूति पादः – सूत्रम् 22)
13. ध्रुवे तद्गतिज्ञानम् - (योगसूत्रम् – विभूति पादः – सूत्रम् 28)
14. कण्ठकूपे क्षुत्पिपासानिवृत्तिः - (योगसूत्रम् – विभूति पादः – सूत्रम् 30)
15. ततः प्रातिभ...........जायन्ते - (योगसूत्रम् – विभूति पादः – सूत्रम् 36)

**उपयुक्तग्रन्थसूचि**


1. योगसूत्रम् - महर्षि पतञ्जलिः संवत्सरः – 2001 चौखम्भा संस्कृत भवन वाराणसी
2. योगप्रदीपिका भावा गणेशः संवत्सरः – 2001 चौखम्भासंस्कृत भवन वाराणसी
3. राजमार्ताण्डम्, – भोजराजः, संवत्सरः – 2001, चौखम्भासंस्कृत भवन, वाराणसी
4. श्रीभाष्यम्, श्रीभगवद्रामानुजः, संवत्सरः – 1997, उभयवेदान्तग्रन्थमाला, चेन्नै
5. गीताभाष्यम् , – श्रीभगवद्रामानुजः, संवत्सरः – 2000, उभयवेदान्तग्रन्थमाला , चेन्नै